# Shri Pandurangastotram

# શ્રીપાણ્ડુરઙ્ગસ્તોત્રમ્

## Document Information

Text title : Panduranga Stotram

File name : pANDurangastotram.itx

Category : vishhnu, varadAnanda

Location : doc_vishhnu

Author : Swami Varadananda Bharati (Pracharya A. D. AThavale)

Transliterated by : Arun Parlikar

Proofread by : Arun Parlikar

Description/comments : bhAvArchanA

Acknowledge-Permission: Shri Dasganu Maharaj Pratishthan, Gorte https://www.santkavidasganu.org

Latest update : May 19, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 19, 2023

*sanskritdocuments.org*

# શ્રીપાણ્ડુરઙ્ગસ્તોત્રમ્

ૐ શ્રી ।

શ્રીશઙ્કર ।

શ્રીકાન્તં કમલાવરં વરરુચિં શ્રેષ્ઠં રમાવલ્લભં
મોક્તારં કલિપઙ્કુમગ્ન જનતાવૃન્દસ્ય ભક્તપ્રિયમ્ ।
ગોગોપીગણ વેષ્ટિતં મધુરયા વાણ્યા સ્તુતં સજ્જનૈઃ
તં ભીમાતટવાસિનં પ્રભુવરં શ્રીપાણ્ડુરઙ્ગં ભજે ॥ ૧॥

પૃથ્વીવાર્યનલાનિલામ્બરમયં વિશ્વં ધૃતં લીલયા
યેન સ્વાત્પરમાર્થતો હ્યનપરં નાનાકૃતિ ભ્રામકમ્ ।
હેતુસ્તદ્ વ્યવહાર જાતસુલભં ભૂયાદવસ્થાક્રમાત્
ભીમાતટવાસિનં પ્રભુવરં શ્રીપાણ્ડુરઙ્ગં ભજે ॥ ૨॥

ગન્ધર્વાઃ સુરકિન્નરાસુરગણાઃ ગાયન્તિ યં સુસ્વરૈઃ
વેદર્ચા કિલ નેતિ નેતિ વચનૈઃ સ્તોતું ગતા કિઙ્કુરી ।
યં દ્રષ્ટુન્ન શશાક યત્નબહુલૈરુગ્રૈસ્તપોભિર્મુનિઃ
તં ભીમાતટવાસિનં પ્રભુવરં શ્રીપાણ્ડુરઙ્ગં ભજે ॥ ૩॥

નૈવાન્યદ્ભજનીયમસ્ત્યતિવિશાલેઽસ્મિન્ મહીમણ્ડલે
પુણ્યૈસ્તીર્થજલૈરપાવિતજનાઃ શુદ્ધ્યન્તિ યદ્દર્શનાત્ ।
યદ્યદ્કાઙ્ક્ષતિ સાત્વિકોઽન્યગતિકઃ પ્રાપ્નોતિ યત્કીર્તનાત
તં ભીમાતટવાસિનં પ્રભુવરં શ્રીપાણ્ડુરઙ્ગં ભજે ॥ ૪॥

યન્નામસ્મરણાત્પુનન્તિ સુજનાઃ સદ્બુદ્ધિભિઃસાધકાન્
સામાન્યોઽપિ નરો યદીય ભજનાત્મુક્તીં ગતો દુર્લભાન્ ।
અસ્વસ્થં વિકલં મનશ્ચ ભજતે શાન્તિં પદસ્પર્શનાત્
તં ભીમાતટવાસિનં પ્રભુવરં શ્રીપાણ્ડુરઙ્ગં ભજે ॥ ૫॥

કસ્મૈ કુત્ર કથં કિયદ્ વિતરણં કાર્યં ચ કસ્મિન્ક્ષણે

સૂક્ષ્મસ્થૂલતમં કૃતાકૃતમહો જાનાતિ યઃ સર્વદા ।
તુલ્યા યેન ન શક્તિરસ્તિ પરમાકસ્યાઽપિ વિશ્વાખિલે
તં ભીમાતટવાસિનં પ્રભુવરં શ્રીપાણ્ડુરઙ્ગં ભજે ॥ ૬॥

ભૂમૌ પાવનપાવનૌચ ચરણૌ સ્તો યસ્ય કલ્પદ્રુમૌ
ધીર્મેધા સદ્સદ્વિવેક કરણી પ્રજ્ઞા પ્રસન્ના યતઃ ।
સર્વં સાર્થકતાં પ્રયાતિ જનનં યસ્ય પ્રસાદાત્ધ્રુવં
તં ભીમાતટવાસિનં પ્રભુવરં શ્રીપાણ્ડુરઙ્ગં ભજે ॥ ૭॥

જ્ઞાનેશાદિભિરર્ચિતં પદયુગં સદ્ભિઃ સદૈવાન્વિતૈઃ
ધ્યેયં નાસ્તિ વિના યદીયવદનાલ્લોકે પરં સુન્દરાત્ ।
યદ્પાદામ્બુજમાક્ષિકં પરિમલં ચાસ્વાદ્યતે ભાવુકૈઃ
તં ભીમાતટવાસિનં પ્રભુવરં શ્રીપાણ્ડુરઙ્ગં ભજે ॥ ૮॥

પૂતા વિશાલજનતા કૃપયા ચ યેન
ભીમાતટે વિહરતા કમલેક્ષણેન ।
સંસારતપ્તશરણાગત વત્સલેન
તં વિઠ્ઠલં સુજનવન્દ્યતમં નમામિ ॥ ૯॥

મિત્રપ્રીતિવશાદેતદ્ વરદાનન્દભારતી ।
કૃતવાન્ વિઠ્ઠલસ્તોત્રં ચિત્તવૃત્તિપ્રસાદકમ્ ॥

ઇતિ સ્વામી વરદાનન્દભારતીવિરચિતં શ્રીપાણ્ડુરઙ્ગસ્તોત્રં સમ્પૂર્ણમ્ ।

ભાવાર્ચના (પ્રાચાર્ય અ. દા. આઠવલે)

https://www.santkavidasganu.org, https://www.youtube.com/@varad-vani1496

Encoded and proofread by Arun Parlikar

*Shri Pandurangastotram*
pdf was typeset on May 19, 2023

Please send corrections to *sanskrit@cheerful.com*